।। हरिः ॐ ।।

# ।। नारद भक्ति सूत्र ।।

## ।। नारद भक्तिरूसूत्राणि ।।


प्रथमोऽध्यायः रूपरभक्तिस्वरूपम् । सूत्र १रू२४

द्वितीयोऽध्यायः रूपरभक्तिमहत्त्वम् । सूत्र २५रू३३

तृतीयोऽध्यायः रूभक्तिसाधनानि । सूत्र ३४रू५०

चतुर्थोऽध्यायः रूप्रेमनिर्वचनम् । सूत्र ५१रू६६

पञ्चमोऽध्यायः रूमुख्यभक्तिमहिमा । सूत्र ६७रू८४

# प्रथमोऽध्यायः रूपरभक्तिस्वरूपम्।

१ अथातो भक्तिं व्याख्यास्यामः।

२ सा त्वस्मिन् परप्रेमरूपा।

३ अमृतस्वरूपा च।

४ यल्लब्ध्वा पुमान् सिध्दो भवति अमृतो भवति तृप्तो भवति।

५ यत्प्राप्य न किञ्चिद् वाञ्छति न शोचति न द्वेष्टि न रमते नोत्साही भवति।

६ यज्ज्ञात्वा मत्तो भवति स्तब्धो भवति आत्मारामो भवति।

७ सा न कामयमाना निरोधरूपत्वात्।

८ निरोधस्तु लोकवेदव्यापारन्यासः।

९ तस्मिन्ननन्यता तद्विरोधिषूदासीनता च।

१० अन्याश्रयाणां त्यागोनन्यता।

११ लोकवेदेषु तदनुकूलाचरणं तद्विरोधिषूदासीनता।

१२ भवतु निश्चयदार्ढ्यादूर्ध्वं शास्त्ररक्षणम्।

१३ अन्यथा पातित्यशङ्कया।

१४ लोकोऽपि तावदेव भोजनादि व्यापारस्त्वाशरीरधारणावधि।

१५ तल्लक्षणानि वाच्यन्ते नानामतभेदात्।

१६ पूजादिष्वनुराग इति पाराशर्यः।

१७ कथादिष्विति गर्गः।

१८ आत्मरत्यविरोधेनेति शाण्डिल्यः।

१९ नारदस्तु तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति।

२० अस्त्येवमेवम्।

२१ यथा व्रजगोपिकानाम्।

२२ तत्रापि न माहात्म्यज्ञानविस्मृत्यपवादः।

२३ तद्विहीनं जाराणामिव।

२४ नास्त्येव तस्मिन् तत्सुखसुखित्वम्।

# द्वितीयोऽध्यायः रूपरभक्तिमहत्त्वम्।

२५ सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा।

२६ फलरूपत्त्वात्।

२७ ईश्वरस्याप्यभिमानद्वेषित्वात् दैन्यप्रियत्वात् च।

२८ तस्याः ज्ञानमेव साधनमित्येके।

२९ अन्योन्याश्रयत्वमित्यन्ये।

३० स्वयं फलरूपतेति ब्रह्मकुमारः।

३१ राजगृहभोजनादिषु तथैव दृष्टत्वात्।

३२ न तेन राजा परितोषः क्षुच्छान्तिर्वा।

३३ तस्मात् सैव ग्राह्या मुमुक्षुभिः।

# तृतीयोऽध्यायः रूभक्तिसाधनानि।

३४ तस्याः साधनानि गायन्त्याचार्याः।

३५ तत्तु विषयत्यागात् सङ्गत्यागात् च।

३६ अव्यावृत्तभजनात्।

३७ लोकेऽपि भगवद्गुणश्रवणकीर्तनात्।

३८ मुख्यतस्तु महत्कृपयैव भगवत्कृपालेशाद् वा।

३९ महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च।

४० लभ्यतेऽपि तत्कृपयैव।

४१ तस्मिंस्तज्जने भेदाभावात्।

४२ तदेव साध्यतां तदेव साध्यताम्।

४३ दुस्सङ्गः सर्वथैव त्याज्यः।

४४ कामक्रोधमोहस्मृतिभ्रंशबुध्दिनाशकारणत्वात्।

४५ तरङ्गायिता अपीमे सङ्गात् समुत्रायन्ते।

४६ कस्तरति कस्तरति मायाम्क्रयः सङ्गं त्यजति यो महानुभावं सेवते निर्ममो भ
वति।

४७ यो विविक्तस्थानं सेवते यो लोकबन्धमुन्मूलयति निस्त्रैगुण्यो भवति योगक्षेमं त्यजति।

४८ यः कर्मफलं त्यजति कर्माणि सन्न्यस्स्यति ततो निर्द्वन्द्वो भवति।

४९ यो वेदानपि सन्न्यस्यति केवलमविच्छिन्नानुरागं लभते।

५० स तरति स तरति स लोकांस्तारयति।

## चतुर्थोऽध्यायः रूप्रेमनिर्वचनम्।

५१ अनिर्वचनीयं प्रेमस्वरूपम्।

५२ मूकास्वादनवत्।

५३ प्रकाशते क्वापि पात्रे।

५४ गुणरहितं कामनारहितं प्रतिक्षणवर्धमानं अविच्छिन्नं सूक्ष्मतरं अनुभवरूपम्।

५५ तत्प्राप्य तदेवावलोकति तदेव शृणोति तदेव भाषयति तदेव चिन्तयति।

५६ गौणी त्रिधा गुणभेदाद् आर्तादिभेदाद् वा।

५७ उत्तरस्मादुत्तरस्मात् पूर्व पूर्वा श्रेयाय भवति।

५८ अन्य मात् सौलभं भक्तौ।

५९ प्रमाणान्तरस्यानपेक्षत्वात् स्वयं प्रमाणत्वात्।

६० शान्तिरूपात् परमानन्दरूपाच्च।

६१ लोकहानौ चिन्ता न कार्या निवेदितात्मलोकवेदत्वात्।

६२ न तत्सिध्दौ लोकव्यवहरओ हेयः किन्तु फलत्यागः तत्साधनं च।

६३ स्त्रीधननास्तिकचरित्रं न श्रवणीयम्।

६४ अभिमानदम्भादिकं त्याज्यम्।

६५ तदर्पिताखिलाचारः सन् कामक्रोधाभिमानादिकं तस्मिन्नेव करणीयम्।

६६ त्रिरूपभङ्गपूर्वकम् नित्यदास्यनित्यकान्ताभजनात्मकं प्रेम कार्यं प्रेमैव कार्यम्।

## पञ्चमोप्ऽध्यायः रुमुख्यभक्तमहिमा।

६७ भक्ता एकान्तिनो मुख्याः।

६८ कण्ठावरोधरोमञ्चाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि पृथिवीं च।

६९ तीर्थीकुर्वन्ति तीर्थानि सुकर्मी कुर्वन्ति कर्माणि सच्छास्त्रीकुर्वन्ति शास्त्राणि।

७० तन्मयाः।

७१ मोदन्ते पितरो नृत्यन्ति देवतः सनाथा चेयं भूर्भवति।

७२ नास्ति तेषु जातिविद्यारूपकुलधनक्रियादि भेदः।

७३ यतस्तदीयाः।

७४ वादो नावलम्ब्यः।

७५ बाहुल्यावकाशत्वाद् अनियतत्त्वाच्च।

७६ भक्तिशस्त्राणि मननीयानि तदुद्बोधकर्माणि करणीयानि।

७७ सुखदुःखेच्छालाभादित्यक्ते प्रतीक्ष्यमाणे क्षणार्धमपि व्यर्थ न नेयम्।

७८ अहिंसासत्यशौचदयास्तिक्यादिचारित्रयाणि परिपालनीयानि।

७९ सर्वदा सर्वभावेन निश्चिन्तैः भगवानेव भजनीयः।

८० स कीर्त्यमानः शीघ्रमेवाविर्भवत्यनुभावयति भक्तान्।

८१ त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी।

८२ गुणमाहात्म्यासक्तिरुरुपासक्तिरुपूजासक्तिरुस्मरणासक्तिरुदास्यासक्तिरुसरु
यासक्तिरुवात्सल्यसक्तिरुकान्तासक्तिरुआत्मनिवेदनासक्तिरुतन्मयतासक्तिरुप
रमविरहासक्तिरुरुपा एकधा अपि एकादशधा भवति।

८३ इत्येवं वदन्ति जनजल्पनिर्भयाः एकमतः कुमाररुव्यासरुशुकरुशाण्डिल्यरुगग
ारुविष्णुरुकौण्डिन्यरुशेषोध्दवारुणिरुबलिरुहनुमद्रुविभीषणादयो भक्त्याचार्याः।

८४ य इदं नारदप्रोक्तं शिवानुशासनं विश्वसिति श्रध्दते स भक्तिमान् भवति सः
प्रेष्टं लभते सः प्रेष्टं लभते।

॥ ॐ तत् सत् ॥

*[ultima revisione 23/12/2002 - tulasi@tin.it]*